# Shri Ramavarnamalika Stotram

# શ્રીરામવર્ણમાલિકાસ્તોત્રમ્

## Document Information

Text title : Shri Ramavarnamalika Stotram

File name : rAmavarNamAlikAstotram.itx

Category : raama, varNamAlA

Location : doc_raama

Author : rAmabhadradIkShita

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH 04-18

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

Shri Ramavarnamalika Stotram

# શ્રીરામવર્ણમાલિકાસ્તોત્રમ્

અન્તસ્સમસ્તજગતાં યમનુપ્રવિષ્ટ-
    માચક્ષતે મણિગણેષ્વિવ સૂત્રમાર્યાઃ ।
તં કેલિકલ્પિતરઘૂદ્વહરૂપમાદ્યં
    પઙ્કેરુહાક્ષમનિશં શરણં પ્રપદ્યે ॥ ૧॥

આમ્નાયશૈલશિખરૈકનિકેતનાય
    વાલ્મીકિવાગ્જલનિધિપ્રતિબિમ્બિતાય ।
કાલામ્બુદાય કરુણારસમેદુરાય
    કસ્મૈચિદસ્તુ મમ કાર્મુકિણે પ્રણામઃ ॥ ૨॥

ઇન્દુપ્રસાદમવતંસયતા તદીયં
    ચાપં કરે હુતવહં વહતા હરેણ ।
શઙ્કે જગત્ત્રયમનુગ્રહનિગ્રહાભ્યાં
    સંયોજ્યતે રઘુપતે સમયાન્તરેષુ ॥ ૩॥

ઈદૃગ્વિધસ્ત્વમિતિ વેદ ન સોઽપિ વેદઃ
    શક્તોઽન્તિકસ્થિતમવેક્ષિતુમુત્તમાઙ્ગે ।
શ્રોતું ક્ષમં ન કુદૃશેક્ષિતુમપ્યતસ્ત્વાં
    સર્વે વિદન્તુ કથમીશ કથં સ્તુવન્તુ ॥ ૪॥

ઉષ્ણાંશુબિમ્બમુદધિસ્મયઘસ્મરાસ્ત્ર
    ગ્રાવા ચ તુલ્યમજનિષ્ટ ગૃહં યથા તે ।
વાલ્મીકિવાગપિ મદુક્તિરપિ પ્રભું ત્વાં
    દેવ પ્રશંસતિ તથા યદિ કોઽત્ર દોષઃ ॥ ૫॥

ઊઢઃ પુરાસિ વિનતાન્વયસમ્ભવેન
    દેવ ત્વયા કિમધુનાપિ તથા ન ભાવ્યમ્ ।
પૂર્વે જના મમ વિનેમુરસંશયં ત્વાં
    જાનાસિ રાઘવ તદન્વયસમ્ભવં મામ્ ॥ ૬॥

ઋક્ષં પ્લવઙ્ગમપિ રક્ષસિ ચેન્મહાત્મન્
    વિપ્રેષુ કિં પુનરથાપિ ન વિશ્વસામ ।
અત્રાપરાધ્યતિ કિલ ૧ પ્રથમદ્વિતીયૌ
    વર્ણૌ તવૌદનતયા ૨ નિગમો વિવૃણ્વન્ ॥ ૭॥

નૃણાં ન કેવલમસિ ત્રિદિવૌકસાં ત્વં
    રાજા યમાર્કમરુતોઽપિ યતસ્ત્રસન્તિ ।
દીનસ્ય વાઙ્મમ તથા વિતતે તવ સ્યાત્
    કર્ણે રઘૂદ્વહ યતઃ કકુભોઽપિ જાતાઃ ॥ ૮॥

ક્લૃપ્તામપિ વ્યસનિનીં ભવિતવ્યતાં મે
    નાથાન્યથા કુરુ તવ પ્રભુતાં દિદૃક્ષોઃ ।
ચક્રે શિલાપિ તરુણી ભવતા તદાસ્તાં
    માયાપિ યદ્ઘટયતે તવ દુર્ઘટાનિ ॥ ૯॥

એકં ભવન્તમૃષયો વિદુરદ્વિતીયં
    જાનામિ કાર્મુકામહં તુ તવ દ્વિતીયમ્ ।
શ્રુત્યાશ્રિતા જગતિ યદ્ગુણઘોષણા સા
    દૂરીકરોતિ દુરિતાનિ સમાશ્રિતાનામ્ ॥ ૧૦॥

ઐશં શરાસમચલોપમમિક્ષુવલ્લી-
    ભઞ્જં બભઞ્જ કિલ યસ્તવ બાહુદણ્ડઃ ।
તસ્ય ત્વશીતકરવંશવતંસ શંસ
    કિં દુષ્કરો ભવતિ મે વિધિપાશભઙ્ગઃ ॥ ૧૧॥

ઓજસ્તવ પ્રહિતશેષવિષાગ્નિદગ્ધૈઃ
    સ્પષ્ટં જગદ્ભિરુપલભ્ય ભયાકુલાનામ્ (?) ।
ગીતોક્તિભિસ્ત્વયિ નિરસ્ય મનુષ્યબુદ્ધિં
    દેવ સ્તુતોઽસિ વિધિવિષ્ણુવૃષધ્વજાનામ્ ॥ ૧૨॥

ઔત્કણ્ઠ્યમસ્તિ દશકણ્ઠરિપો મમૈકં
    દ્રક્ષ્યામિ તાવકપદામ્બુરુહં કદેતિ ।
અપ્યેતિ કર્મ નિખિલં મમ યત્ર દૃષ્ટે
    લીનાશ્ચ યત્ર યતિભિઃ સહ મત્કુલીનાઃ ॥ ૧૩॥

અમ્ભોનિધાવવધિમત્યવકીર્ય બાણાન્

કિં લબ્ધવાનસિ નનુ શ્વશુરસ્તવાયમ્ ।
ઇષ્ટાપનેતુમથવા યદિ બાણકણ્ડૂ-
ર્દૈવાયમસ્યનવધિર્મમ દૈન્યસિન્ધુઃ ॥ ૧૪॥

અશ્રાન્તમર્હતિ તુલામમૃતાંશુબિમ્બં
ભગ્નામ્બુજદ્યુતિમદેન ભવન્મુખેન ।
અસ્માદભૂદનલ ઇત્યકૃતોક્તિરીશ
સત્યા કથં ભવતુ સાધુવિવેકભાજામ્ ॥ ૧૫॥

કલ્યાણમાવહતુ નઃ કમલોદરશ્રી-
રાસન્નવાનરભટૌઘગૃહીતશેષઃ ।
શ્લિષ્યન્ મુનીન્ પ્રણતદેવશિરઃકિરીટ-
દામ્નિ સ્ખલન્ દશરથાત્મજ તે કટાક્ષઃ ॥ ૧૬॥

Footnote

૧. બ્રાહ્મણક્ષત્રિયૌ । “યસ્ય બ્રહ્મ ચ ક્ષત્રં ચ
ઉભે ભવત ઓદનઃ” ઇતિ કઠવાલ્લિરનુસન્ધેયા ।

ખંવાયુરગ્નિરુદકં પૃથિવી ચ શબ્દઃ
સ્પર્શશ્ચ રૂપરસગન્ધમપિ ત્વમેવ ।
......... દયયાત્મબન્ધો
ધત્સે વપુઃ શરશરાસભૃદબ્દનીલમ્ ॥ ૧૭॥

ગઙ્ગા પુનાતિ રઘુપુઙ્ગવ યત્પ્રસૂતા
યદ્રેણુના ચ પુપુવે યમિનઃ કલત્રમ્ ।
તસ્ય ત્વદઙ્ઘ્રિકમલસ્ય નિષેવયા સ્યાં
પૂતો યથા પુનરઘેઽપિ તથા પ્રસીદ ॥ ૧૮॥

ઘણ્ટાઘણઙ્ઘણિતકોટિશરાસનં તે
લુણ્ટાકમસ્તુ વિપદાં મમ લોકનાથ ।
જિહ્વાલુતાં વહતિ યદ્ભુજગો રિપૂણાં
ઉષ્ણૈરસૃગ્ભિરુદરમ્ભરિણા શરેણ ॥ ૧૯॥

પ્રાઙ્સ્યવાઙ્સિ પરેશ તથાસિ તિર્યક્
બ્રૂમઃ કિમન્યદખિલા અપિ જન્તવોઽસિ ।
એકક્રમેપિ તવ વા ભુવિ ન મ્રિયન્તે (? )
મન્દસ્ય રાઘવ સહસ્વ મમાપરાધમ્ ॥ ૨૦॥

ચણ્ડાનિલવ્યતિકરક્ષુભિતામ્બુવાહ-
    દમ્ભોલિપાતમિવ દારુણમન્તકાલમ્ ।
સ્મૃત્વાપિ સમ્ભવિનમુદ્વિજતે ન ધન્યો
    લબ્ધ્વા શરણ્યમનરણ્યકુલેશ્વરં ત્વામ્ ॥ ૨૧॥

છન્નં નિજં કુહનયા મૃગરૂપભાજો
    નક્તઞ્ચરસ્ય ન કિમાવિરકારિ રૂપમ્ ।
ત્વત્પત્રિણાપિ રઘુવીર મમાદ્ય માયા-
    ગૂઢસ્વરૂપવિવૃતૌ તવ કઃ પ્રયાસઃ ॥ ૨૨॥

જન્તોઃ કિલ ત્વદભિધા મમ કર્ણિકાયાં
    કર્ણેજપન્ હરતિ કશ્ચન પઞ્ચકોશાન્ ।
ઇત્યામનન્તિ રઘુવીર તતો ભવન્તં
    રાજાધિરાજ ઇતિ વિશ્વસિમઃ કથં વા ॥ ૨૩॥

ઝઙ્કારિભૃઙ્ગકમલોપમિતં પદં તે
    ચારુસ્તવપ્રવણચારણકિન્નરૌઘમ્ ।
જાનામિ રાઘવ જલાશયવાસયોગ્યં
    સ્વૈરં વસેત્તદધુનૈવ જલાશયે મે ॥ ૨૪॥

જ્ઞાનેન મુક્તિરિતિ નિશ્ચિતમાગમજ્ઞૈ-
    ર્જ્ઞાનં ક્વ મે ભવતુ દુસ્ત્યજવાસનસ્ય ।
દેવાભયં વિતર કિં નુ સકૃત્પ્રપત્ત્યા
    મહ્યં ન વિસ્મર પુરૈવ કૃતાં પ્રતિજ્ઞામ્ ॥ ૨૫॥

ટઙ્કારમીશ ભવદીયશરાસનસ્ય
    જ્યાસ્ફાલનેન જનિતં નિગમં પ્રતીમઃ ।
યેનૈવ રાઘવ ભવાનવગમ્ય માસ-
    ત્રાસં નિરસ્ય સુખમાતનુતે બુધાનામ્ ॥ ૨૬॥

ઠાત્કૃત્ય મણ્ડલમખણ્ડિ યદુષ્ણભાનો-
    ર્દેવ ત્વદસ્ત્રદલિતૈર્યુધિ યાતુધાનૈઃ ।
શઙ્કે તતસ્તવ પદં વિદલય્ય વેગા-
    ત્તૈરદ્ભુતં પ્રતિકૃતિર્વિદધે વધસ્ય ॥ ૨૭॥

ડિમ્ભસ્તવાસ્મિ રઘુવીર તથા દયસ્વ

    લભ્યં યથા કુશલવત્વમપિ ક્ષિતૌ મે ।
કિઞ્ચિન્મનો મયિ નિધેહિ તવ ક્ષતં કિં
    વ્યર્થા ભવત્વમનસં ગૃણતી શ્રુતિસ્ત્વામ્ ॥ ૨૮॥

ઢક્કાં ત્વદીયયશસા મધુનાપિ શ‍ૃણ્મઃ
    પ્રાચેતસસ્ય ભણિતિં ભરતાગ્રજન્મન્ ।
સત્યે યશસ્તવ શ‍ૃણોતિ મૃકણ્ડુસૂનો-
    ર્ધાતાપ્યતો જગતિ કો હિ ભવાદૃશોઽન્યઃ ॥ ૨૯॥

ત્રાણં સમસ્તજગતાં તવ કિં ન કાર્યં
    સા કિં ન તત્ર કરણં કરુણા તવૈવ ।
આખ્યાતિ કાર્યકરણે તવ નેતિ યા વાઙ્-
    મુખ્યા ન સા રઘુપતે ભવતિ શ્રુતીનામ્ ॥ ૩૦॥

તત્ત્વમ્પદે પદમસીતિ ચ યાનિ દેવ
    તેષાં યદસ્યભિલષન્નુપલબ્ધુમર્થાન્ ।
સેવે પદદ્વયમતો મૃદુલં ન વાદૌ
    યદ્દારુણૈરપિ તતો ભવદર્થલાભઃ (? ) ॥ ૩૧॥

પ્રોથં યદુદ્વહસિ ભૂમિવહૈકદંષ્ટ્રં
    વિશ્વપ્રભો વિઘટિતાભ્રઘટાઃ સટા વા ।
રૂપં તદુદ્ભટમપાસ્ય રુચાસિ દિષ્ટ્યા
    ત્વં શમ્બરારિરપિ કૈતવશમ્બરારિઃ (? ) ॥ ૩૨॥

દગ્ધ્વા નિશાચરપુરી પ્રથિતસ્તવૈકો
    ભક્તેષુ દાનવપુરત્રિતયં તથાન્યઃ ।
ત્વગ્ચાશરાવ્યુરસમસ્યગુણૈઃ પ્રભો મે
    પુર્યષ્ટકપ્રશમનેન લભસ્વ કીર્તિમ્ (? ) ॥ ૩૩॥

ધત્તે શિરાંસિ દશ યસ્સુકરો વધોઽસ્ય
    કિં ન ત્વયા નિગમગીતસહસ્રમૂર્ધ્ના ।
મોહં મમામિતપદં યદિ દેવ હન્યાઃ
    કીર્તિસ્તદા તવ સહસ્રપદો બહુઃ સ્યાત્ ॥ ૩૪॥

નમ્રસ્ય મે ભવ વિભો સ્વયમેવ નાથો
    નાથો ભવ ત્વમિતિ ચોદયિતું બિભેમિ ।
યેન સ્વસા દશમુખસ્ય નિયોજયન્તી

નાથો ભવ ત્વમિતિ નાસિકયા વિહીના ॥ ૩૫॥

પર્યાકુલોઽસ્મિ કિલ પાતકમેવ કુર્વન્
દીનં તતઃ કરુણયા કુરુ મામપાપમ્ ।
કર્તું રઘૂદ્વહ નદીનમપાપમુર્વ્યાં
શક્તસ્ત્વમિત્યયમપૈતિ ન લોકવાદઃ ॥ ૩૬॥

ફલ્ગૂનિ યદ્યપિ ફલાનિ ન લિપ્સતે મે
ચેતઃ પ્રભો તદપિ નો ભજતિ પ્રકૃત્યા ।
મૂર્ત્યન્તરં વ્રજવધૂજનમોહનં તે
જાનાતિ ફલ્ગુ ન ફલં ભુવિ યત્પ્રદાતુમ્ ॥ ૩૭॥

બર્હિશ્છદગ્રથિતકેશમનર્હવેષ-
માદાય ગોપવનિતાકુચકુઙ્કુમાઙ્કમ્ ।
હ્રીણો ન રાઘવ ભવાન્ યદતઃ પ્રતીમઃ
પત્ન્યા હ્રિયા વિરહિતોઽસિ પુરા શ્રિયેવ ॥ ૩૮॥

ભદ્રાય મેઽસ્તુ તવ રાઘવ બોધમુદ્રા
વિદ્રાવયન્ત્યખિલમાન્તરમન્ધકારમ્ ।
મન્ત્રસ્ય તે પરિપુનન્તિ જગદ્યથાષ-
ડષ્ટાક્ષરાણ્ય(પિ તથૈવ) વિવૃણ્વતી સા ॥ ૩૯॥

મન્દં નિધેહિ હૃદિ મે ભગવન્નટવ્યાં
પાષાણકણ્ટકસહિષ્ણુ પદામ્બુજં તે ।
અઙ્ગુષ્ઠમાત્રમથવાત્ર નિધાતુમર્હ-
સ્યાક્રાન્તદુન્દુભિતનૂકઠિનાસ્થિકૂટમ્ ॥ ૪૦॥

યજ્ઞેન દેવ તપસા યદનાશકેન
દાનેન ચ દ્વિજગણૈર્વિવિદિષ્યસે ત્વમ્ ।
ભાગ્યેન મે જનિતૃષા તદિદં યતસ્ત્વાં
ચાપેષુભાક્ પરમબુધ્યત જામદગ્ન્યઃ ॥ ૪૧॥

રમ્યોજ્જ્વલસ્તવ પુરા રઘુવીર દેહઃ
કામપ્રદો યદભવત્ કમલાલયાયૈ ।
ચિત્રં કિમત્ર ચરણામ્બુજરેણુરેખા
કામં દદૌ ન મુનયે કિમુ ગૌતમાય ॥ ૪૨॥

લઙ્કેશવક્ષસિ નિવિશ્ય યથા શરસ્તે
    મન્દોદરીકુચતટીમણિહારચોરઃ ।
શુદ્ધે સતાં હૃદિ ગતસ્ત્વમપિ પ્રભો મે
    ચિત્તે તથા હર ચિરોવનતામવિદ્યામ્ ॥ ૪૩॥

વન્દે તવાઙ્ઘ્રિકમલં શ્વશુરં પયોધે-
    સ્તાતં ભુવશ્ચ રઘુપુઙ્ગવ રેખયા યત્ ।
વજ્રં બિભર્તિ ભજદાર્તિગિરિં વિભેત્તું
    વિદ્યાં નતાય વિતરેયમિતિ ધ્વજં ચ ॥ ૪૪॥

શમ્ભુઃ સ્વયં નિરદિશદ્ગિરિકન્યકાયૈ
    યન્નામ રામ તવ નામસહસ્રતુલ્યમ્ ।
અર્થં ભવન્તમપિ તદ્વહદેકમેવ
    ચિત્રં દદાતિ ગૃણતે ચતુરઃ કિલાર્થાન્ ॥ ૪૫॥

ષટ્ તે વિધિપ્રભૃતિભિઃ સમવેક્ષિતાનિ
    મન્ત્રાક્ષરાણિ ઋષિભિર્મનુવંશકેતો ।
એકેન યાનિ ગુણિતાન્યપિ માનસેન
    ચિત્રં નૃણાં ત્રિદશતામુપલમ્ભયન્તિ ॥ ૪૬॥

સર્ગસ્થિતિપ્રલયકર્મસુ ચોદયન્તી
    માયા ગુણત્રયમયી જગતો ભવન્તમ્ ।
બ્રહ્મેતિ વિષ્ણુરિતિ રુદ્ર ઇતિ ત્રિધા તે
    નામ પ્રભો દિશતિ ચિત્રમજન્મનોઽપિ ॥ ૪૭॥

હંસોઽસિ માનસચરો મહતાં યતસ્ત્વં
    સમ્ભાવ્યતે કીલ તતસ્તવ પક્ષપાતઃ ।
મય્યેનમર્પય ન ચેદ્રઘુનન્દન ? ?
    જિષ્ણોરપિ ત્રિભુવને સમવ ? ?॥ ૪૮॥

લક્ષ્મીર્યતોઽજનિ યથૈવ જલાશયાના-
    મેકો રુષા તવ તથા કૃપયાપિ કાર્યઃ ।
અન્યોઽપિ કશ્ચિદિતિ ચેદહમેવ વર્તે
    તાદૃગ્વિધસ્તપનવંશમણે કિમન્યૈઃ ॥ ૪૯॥

ક્ષન્તું ત્વમર્હસિ રઘૂદ્વહ મેઽપરાધાન્
    સર્વંસહા નનુ વધૂરપિ તે પુરાણી ।

વાસાલયં ચ નનુ હૃત્કમલં મદીયં
    કાન્તાપરાપિ ન હિ કિં કમલાલયા તે ॥ ૫૦॥

ઇત્થં મમ સ્તુવદમર્ત્યનિગદ્યમાન-
    ત્રય્યન્તમન્ત્રમુખરીકૃતપાદપીઠ ।
રાજાધિરાજ કૃપયા રઘુવીર વર્ણ-
    માલાસ્તવં ત્વમવકર્ણયિતું પ્રસીદ ॥ ૫૧॥

ઇતિ શ્રીમદ્રામભદ્રદીક્ષિતવિરચિતં શ્રીરામવર્ણમાલિકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Ramavarnamalika Stotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*